Roll No. ....................

# H-19936

## कक्षा 9 वीं परीक्षा, 2018–19

# SANSKRIT GENERAL

## संस्कृत सामान्यम

[Total No. of Questions: 19] [Total No. of Printed Pages: 08]

[Time: 03 Hours] [Maximum Marks: 100]

---

*निर्देशाः –*

*(i) सर्वे प्रश्नाः करणीयाः।*

*(ii) लेखनं सुवाच्यं स्पष्टं च भवतु।*

*(iii) सर्वेषां प्रश्नानां समक्षे अङ्काः प्रदत्ताः।*

प्र.1 अधोलिखितेषु उचितं विकल्पं चित्वा लिखत – (1×5=5)

(क) गुणसन्धेः उदाहरणं किम् –

(i) विद्यालयः (ii) भाग्योदयः

(iii) कपीशः (iv) पवनम्

(ख) "दिग्गजः" इत्यस्य पदस्य सन्धि–विच्छेदः –

(i) दिक् + गजः (ii) दिग + गजः

(iii) दिश + गजः (iv) दिग्ग + जः

(ग) "विपद + लीनः" इत्यस्य पदस्य सन्धिः –

(i) विपल्लीमः (ii) विपल्लीनः

(iii) विपद्लीनः (iv) कोऽपि न

(घ) "निस्तारः" कस्य सन्धेः उदाहरणम् –

(i) गुणसन्धेः (ii) दीर्घसन्धेः

(iii) विसर्गसन्धेः (iv) अयादिसन्धेः

(ङ) "सङ्गीता खलु नृत्यं करिष्यति" इत्यस्मिन् अव्ययपदम् –

(i) सङ्गीता (ii) नृत्यं

(iii) खलु (iv) करिष्यति



https://www.evidyarthi.in/

प्र.2 अधोलिखितेषु उचितं विकल्पं चित्वा लिखत – (1×5=5)

(क) उपगङ्गम्–इत्यस्मिन् समासः –

(i) द्वन्द्वः (ii) द्विगुः

(iii) कर्मधारयः (iv) अव्ययीभावः

(ख) "पितरौ" इति पदस्य समास विग्रहः –

(i) पिता च पिता च (ii) माता च माता च

(iii) माता च पिता च (iv) कोऽपि न

(ग) कर्मधारय–समासस्य उदाहरणम् –

(i) चन्द्रशेखरः (ii) यथाशक्तिः

(iii) पञ्चवटी (iv) नीलोत्पलम्

(घ) "दुरुपयोगः" पदे उपसर्गः –

(i) दु (ii) दुः

(iii) दुर् (iv) दुरु

(ङ) उपसर्गयुक्तं पदम् –

(i) पठनीयः (ii) कर्तव्यम

(iii) अवतारः (iv) लघूत्तरः

प्र.3 उचित–विकल्पं चित्वा लिखत – (1×5=5)

(क) "हसानि" इत्यस्मिन् पदे लकारः –

(i) लट् लकारः (ii) विधिलिङ् लकारः

(iii) लृट् लकारः (iv) लोट् लकारः

(ख) "पठिष्यसि" इत्यस्मिन् पदे पुरुषः –

(i) प्रथमपुरुषः (ii) मध्यमपुरुषः

(iii) उत्तमपुरुषः (iv) कोऽपि न

(ग) "गच्छेयुः" इत्यस्मिन् पदे मूल धातुः –

(i) गच्छ् (ii) गम्

(iii) गमन् (iv) कोऽपि न

(घ) "सेवन्ते" इत्यस्मिन् पदे वचनम् –

(i) बहुवचनम् (ii) द्विवचनम्

(iii) एकवचनम् (iv) अन्यवचनम्

(ङ) "हा! सज्जनः पीडितः दुर्जनेन" वाक्ये अव्ययम् अस्ति –

(i) सज्जनः (ii) पीडितः

(iii) दुर्जनः (iv) हा



https://www.evidyarthi.in/

प्र.4 उचित-विकल्पं चित्वा लिखत - (1×5=5)

(क) "कोकिला" इत्यस्मिन् पदे प्रत्ययः अस्ति –

(i) तमप् (ii) टाप्

(iii) ङीप् (iv) अनीयर्

(ख) "मतिमान्" इत्यस्मिन् पदे प्रत्ययः अस्ति–

(i) तरप् (ii) तमप्

(iii) मतुप् (iv) टाप्

(ग) "क्तवतु" प्रत्ययस्य उदाहरणम् अस्ति–

(i) क्रीडित्वा (ii) पठितः

(iii) गतवान् (iv) विहस्य

(घ) "गम् + क्तिन्" = .............. भवति –

(i) कृतिः (ii) गत्वा

(iii) गमनीयम् (iv) गतिः

(ङ) "आहारे व्यवहारे च त्यक्तलज्जः .............. भवेत् –

(i) सुखी (ii) दुःखी

(iii) ज्ञानी (iv) मूर्खः

प्र.5 प्रदत्तैः शब्दैः रिक्त स्थान–पूर्तिं कुरुत – (1×5=5)

(i) दिक्षु .............. कीर्तिम्। (करोति/तनोति)

(ii) पितरौ .............. आस्ताम्। (बुभुक्षितौ/पिपासितौ)

(iii) गृध्रकूटनाम्नि .............. पर्कटीवृक्षः। (पर्वते/गृहे)

(iv) वत्स! मुञ्च ..............। (क्रीडनकम्/बालमृगेन्द्रम्)

(v) तस्य अहं .............. इति नाम करिष्यामि। (विष्णु शर्मा/सोम शर्मा)



https://www.evidyarthi.in/

प्र.6 अधोलिखितेषु प्रश्नेषु कानिचित् त्रीणि उत्तराणि एकवाक्येन संस्कृते लिखत – (6)

(i) विप्रः गोभिः का गृहीष्यति?

(ii) देहस्य सारं किम्?

(iii) अष्टमूर्तिः इदानीं केन नाम्ना प्रख्याता?

(iv) श्रवणः पित्रोः तीर्थाटनम् कथमकारयत?

(v) कृषकाः देशस्य उन्नतिं कथं कुर्वन्ति?

प्र.7 अधोलिखितेषु द्वयोः शब्दयोः रूपाणि त्रिषु वचनेषु निर्देशानुसारं लिखत – (2)

(i) राम – सप्तमी–विभक्तिः

(ii) गुरु – चतुर्थी–विभक्तिः

(iii) अस्मद् – प्रथमा–विभक्तिः

प्र.8 अधोलिखितेषु शब्देषु विभक्ति–वचनं च लिखत – (2)

(i) तस्मै

(ii) तस्मिन्

प्र.9 अधोलिखितेषु गद्यांशद्वयस्य प्रश्नानाम् उत्तराणि संस्कृते लिखत – (2×5=10)

(क) पूर्वं महर्षिः वाल्मीकिः सप्तर्षीणां सत्सङ्ग प्रभावात् महान् तपस्वी जातः। अनन्तरं रामायण महाकाव्यं विरचितवान्। महद्भिः जनैः प्रतिष्ठितो भूत्वा अश्मा अपि देवत्वं प्राप्नोति। पुष्पाणां संसर्गात् पिपीलिका अपि भगवतः शिवस्य शीर्षस्थितं चन्द्रबिम्बं चुम्बति। अतः सज्जनानां सङ्गः करणीयः दुर्जनानां सङ्गः परिहर्तव्यश्च।

(i) कः महान् तपस्वी जातः?

(ii) रामायण महाकाव्यं कः विरचितवान्?

(iii) पिपीलिका केषां सङ्गात् चन्द्रबिम्बं चुम्बति?

(iv) कैः प्रतिष्ठितो अश्मा देवत्वं प्राप्नोति?

(v) "परिहर्तव्यः" पदे उपसर्गं प्रत्ययं च पृथक् कुरुत?



https://www.evidyarthi.in/

(ख) एवं विश्वास्य स मार्जारस्तरु कोटरे स्थितः। ततो दिनेषु गच्छत्सु पक्षिशावका--नाक्रम्य कोटरमानीय प्रत्यह खादति। येषामपत्यानि खादितानि तै: शाकार्तैर्विलपद्--भिरितस्ततो जिज्ञासा समारब्धा। तत्परिज्ञाय मार्जार कोटरान्नि सृत्य बहि: पलायितः। पश्चात्पक्षिभिरितस्त तो निरूपयद्भिः तत्र तरु कोटरे शावकास्थीनि प्राप्तानि। अनन्तर ते ऊचु -- अनेनैव जरद्गवेन अस्माकं शावकाः खादिताः।

(i) मार्जार: कुत्र स्थित?

(ii) मार्जारः कान् प्रत्यह खादति?

(iii) अनन्तर ते किम् ऊचु:?

(iv) शावकास्थीनि कुत्र प्राप्तानि?

(v) "अननैव" इत्यस्य विच्छेद कृत्वा सन्धि–नाम लिखत?

(ग) उज्जयिनी भारतस्य अत्यन्तं प्राचीनतम् इतिहास–धर्म–दर्शन–कला–साहित्य–योग–ज्योतिषादीनां च केन्द्रम् आसीत्। एषा अवन्तिका, विशाला नाम्नापि शास्त्रेषु वर्णिता अस्ति। अत्र सर्वत्र पुरातात्विकं वैभवं दृष्ट्वा मनसि आनन्दो जायते। भगवत: महाकालस्य पुरीयं देशे श्रद्धायां केन्द्रम् अस्ति।

(i) उज्जयिनी कस्य केन्द्र अस्ति?

(ii) एषा शास्त्रेषु केन नाम्ना वर्णिता?

(iii) पुरीयं कस्य श्रद्धा केन्द्रमस्ति?

(iv) "दृष्ट्वा" इत्यस्य प्रकृति–प्रत्ययौ पृथक् कुरुत?

(v) "श्रध्दायाम्" इत्यस्य विभक्तिं वचनं च लिखत?

प्र.10 अधोलिखितेषु पद्यांशद्वयस्य प्रश्नानाम् उत्तराणि संस्कृत–भाषायां लिखत– (5X2=10)

(क) रूपयौवन सम्पन्नाः विशाल कुल संभवाः।
विद्याहीनाः न शोभन्ते निर्गन्धाः इव किंशुकाः।।

(i) केन सम्पन्नाः न शोभन्ते?

(ii) केन हीनाः न शोभन्ते?

(iii) निर्गन्धाः किम् इव न शोभन्ते?

(iv) केन संभवाः विद्याहीनाः न शोभन्ते?

(v) "किंशुकाः" इत्यस्य विभक्तिं वचनं च लिखत?



https://www.evidyarthi.in/

(ख) चित्रकूट गते रामे पुत्र शोकातुरस्तदा।

राजा दशरथः स्वर्गे जगाम विलपन् सुतम्।।

(i) कः स्वर्गं गतवान्?

(ii) सुतार्थं कः अविलपत्?

(iii) कः चित्रकूटं जगाम?

(iv) "स्वर्गे" इत्यस्य विभक्तिं वचनं च लिखत?

(v) "शोकातुरः" इत्यस्य सन्धि–विच्छेदं कृत्वा सन्धि नाम लिखत?

(ग) नास्ति क्षुधासमं दुःख, नास्ति रोगः क्षुधासमः।

नास्त्याहारसमं सौख्यं, नास्ति क्रोधसमो रिपुः।।

(i) क्षुधासमं किम् अस्ति?

(ii) केन समं सौख्यम् अस्ति?

(iii) क्रोधसमः कः अस्ति?

(iv) 'नास्ति' इत्यस्य विच्छेदं कृत्वा सन्धेः–नाम लिखत?

(v) "रिपुः" शब्दस्य पर्यायवाची–शब्दं लिखत?

प्र.11 अधोलिखितेषु चतुर्णां पदानां उचितं युग्म–मेलनं कुरुत– (4)

| | | | |
|---|---|---|---|
| (क) | प्राणायामेन | (i) | विक्रमः २ |
| (ख) | युधि | (ii) | हस्तीभक्षितः ५ |
| (ग) | चिदम्बरस्य | (iii) | नटराजस्य ३ |
| (घ) | लङ्काद्हनम् | (iv) | रोगक्षयो १ ⊕ |
| (ङ) | श्रृगालैः | (v) | हनुमान् कृतवान् ६ ५ |

प्र.12 शुद्धवाक्यानां समक्षं "आम्" अशुद्धवाक्यानां समक्षं 'न' इति लिखत – (4)

(क) कर्तव्यपालनम् आवश्यकं नास्ति।

(ख) श्रवणः तमसातीरं न गतवान्।

(ग) सज्जने विश्वासः करणीयः।

(घ) सुग्रीवः वालिनं हतवान्।



https://www.evidyarthi.in/

प्र.13 अधोलिखितेषु चतुर्णां प्रश्नानाम् उत्तराणि संस्कृतभाषायाम् एकपदेन लिखत – (4)

(i) नृपपुत्रस्य नाम किम्?

(ii) अन्नात् कानि भवन्ति?

(iii) मदनविनोदः कस्य पुत्रः आसीत्?

(iv) जातस्य ध्रुवं किम्?

(v) देवशर्मा तपः कुत्र अकरोत्?

(vi) सत्सङ्गतिः पापं किं करोति?

प्र.14 प्रश्नपत्रे समागतान् श्लोकान् विहाय स्वपाठ्यपुस्तकात् कण्ठस्थीकृतं श्लोकद्वयं लिखत। (4)

प्र.15 मित्रस्य कृते जन्मदिवसस्य शुभकामना – पत्रं संस्कृते लिखत। (4)

**अथवा**

स्वकीयस्य अध्ययनस्य विषये पितरं प्रति एकं पत्रं संस्कृते लिखत।

प्र.16 अधोलिखितेषु "पञ्च" अशुद्ध वाक्यानां शुद्धिः करणीया – (5)

(i) वृक्षं पत्राणि पतन्ति।

(ii) ग्रामस्य परितः उद्यानम् अस्ति।

(iii) बालः सिंहं बिभेति।

(iv) महेशः फलाय खादति।

(v) त्वं कदा खेलति।

(vi) गुरुं नमः।

प्र.17 अधोलिखित–वाक्यानां क्रम–संयोजनं कुरुत – (5)

(क) अतः अहं "सीताराम–सीताराम" इति वदामि।

(ख) अहं सर्वं खलु पश्यामि आचरामि च।

(ग) तत्र व्याधानां ग्रामः अस्ति।

(घ) सः शुकः व्याधस्य गृहे निवसति।

(ङ) अहं मुनेः आश्रमे निवसामि।



https://www.evidyarthi.in/

प्र.18 अधोलिखितम् अपठितगद्यांशं सम्यक् पठित्वा प्रश्नानाम् उत्तराणि संस्कृत–भाषायां लिखत – (5)

स्वस्थ शरीरे एव स्वस्था बुद्धिः वसति। स्वस्था बुद्धिः एव स्वस्थ विचाराणां जननी अस्ति। व्यायामशीलः मनुष्यः एव निरोगः चिरंजीवी च भवति। व्यायामशीलाः मनुष्याः प्रायेण रूग्णाः न भवन्ति। विविधरोगाणां चिकित्सा अपि व्यायामेन सम्भवति। अतः जीवनस्य कृते व्यायामः परमावश्यकः।

(क) अस्य गद्यांशस्य उचित–शीर्षकं लिखत।

(ख) स्वस्था बुद्धिः कुत्र वसति?

(ग) कः एव निरोगः चिरंजीवी च भवति?

(घ) विविधरोगाणां चिकित्सा केन सम्भवति?

(ङ) "विचाराणां" पदस्य विभक्तिं वचन च लिखत।

प्र.19 अधोलिखितेषु एकं विषयं स्वीकृत्य संस्कृत–भाषायां शतशब्देषु निबन्धं लिखत – (10)

(क) उद्यानम्

(ख) अनुशासनम्

(ग) अस्माकं विद्यालयः

(घ) संस्कृतस्य महत्वम्

..........................................



https://www.evidyarthi.in/